विद्यापतिकृत लिखनावली

(मूल और हिन्दी अनुवाद)

सम्पादक

डा० इन्द्रकान्त झा

एम. ए., पी-एच.डी, डी. लिट्०

युनिवरसिटी प्रोफेसर,

मैथिली विभाग, पटना कालेज,

पटना विश्वविद्यालय, पटना

प्रकाशक

इन्द्रालय प्रकाशन,

जे.एफ १, ब्लॉक न० ७/८०

राजेन्द्रनगर, पटना ८०००१६

VIDYAPATIKRIT LIKHANAWALI

डा.इन्द्रकान्त झा

प्रथम संस्करण -1994

मूल्य : 51 =00

प्रकाशनः
इन्द्रालय प्रकाशन
जे० एफ०-1
ब्लॉक नं-7/80
राजेन्द्रनगर -800016

मुद्रकः
राजकम्प्यूटर्स
धरहराकोठी, नयाटोला,पटना - 4
फोन : -660160

भूमिका ....

मिथिला प्राचीन काल से ही मनीषियों का कर्मक्षेत्र रहा है। चौदहवीं शताब्दी के मनीषियों में विद्यापति के विराट व्यक्तित्व, विलक्षण नैसर्गिक प्रतिभा, वैदुष्य एवं युगचेतना का अनुपम समिश्रण था। उनका ध्यान भूत, वर्त्तमान और भविष्य तीनों पर था। इसलिए उन्हें युगद्रष्टा एवं युग स्रष्टा भी कहा जाता है। उन्होंने मिथिला के ओइनवारवंशीय अनेक राजाओं के आश्रय में रहकर संस्कृत, प्राकृत, अपभ्रंश, अवहट्ठ एवं मैथिली में रचनायें कर मिथिला के साथ-साथ समस्त भारतवर्ष के साहियकारों का मान-सम्मान बढ़ाकर विश्व साहित्य में अपना स्थान जमाया। उन्हें दरबार का चाकचिक्य नहीं प्रभावित किया। उसका फल यह हुआ कि उन्होंने समाज के विभिन्न वर्गो को ध्यान में रखकर रचनाएँ की। उनकी रचनाओं को देखकर ज्ञात होता है कि उन्हें तत्कालीन राजनीति, समाजनीति, धर्मनीति, अर्थनीति का सम्यक ज्ञान था। उन्होंने लोगों के मध्य जो भ्रान्ति धारणायें थी कि संस्कृत के पंडितों को इतिहास एवं भूगोल का ज्ञान नहीं होता है, उसे झूठा प्रमाणित कर दिया। क्योंकि उनके ग्रन्थों पुरूषपरीक्षा और कीर्त्तिलता में ऐतिहासिक तथ्यों का उद्‌घाटन किया गया है। एक ओर पुरूष परीक्षा मे हम्मीरदेव, चिक्कोर के राजा काफरराज, नरसिंह देव, चाचिकदेव, हरिसिंहदेव, विशाखदत्त, हर्ष वराहमिहिर आदि से सम्बन्धित ऐतिहासिक घटनाओं का विवेचन है तो दूसरी ओर कीर्त्तिलता में कीर्त्तिसिंह द्वारा मिथिला-राज्य प्राप्त करने की कहानी के साथ-साथ जौनपुर का वर्णन। इसीलिए बंगला के प्रसिद्ध विद्धान हर प्रसाद शास्त्री ने तो इतना तक कह दिया है कि प्रत्येक इतिहासवेत्ता को पुरूषपरीक्षा अवश्य पढ़नी चाहिए।

पुरूषपरीक्षा एक नीति विषय का ग्रन्थ है। इस पुस्तक में पुरूषार्थ का विवेचन किया गया है। उनका कहना है कि पुरूषाकार व्यक्ति को पुरूष नहीं कहा जा सकता है। पुरूष का लक्षण है:

वीरः सुधीः सविद्यश्च पुरूष : पुरूषार्थवान् ।

तदन्ये पुरूषाकाराः पशवः पुच्छवर्जिता ॥

पुरूष के इन्ही चारों गुणों का वर्णन चार परिच्छेदों में किया गया है । इन चारों परिच्छेदों में पुरूष कौन है, इसके लिए चौआलिस कथाएँ कही गयी है । इन कथाओं द्वारा कलियुग के भूत और वर्त्तमान के पात्रों की जीवनगाथाओं को ऐतिहासिक दृष्टिकोण से उपस्थित किया है । इसक्रम में उनका कहना है कि कृपण, भीरू, चोर, आलसी आदि व्यक्ति पुरूष नहीं है। इसके अलावा पुरूष वह है जो दानवीर, दयावीर, युद्धवीर एवं सत्यवीर है । इसक्रम से उन्होंने समाज के विभिन्न वर्गो के रहन -सहन एवं क्रिया -कलाप को परखने के बाद समाज के लोगों को परिभाषित किया । उनका कहना था कि कृपण वह है जो न तो दान करता है और न भोग करता है, लेकिन धन को प्राण के सदृश रखता है । ऐसे कृपण का प्रातःकाल नाम भी नहीं लेना चाहिए । वंचक वह है जो कूटकर्म मे निपुण, मीठा वचनबोलने वाला कर्म में दारूण एवं दूसरे के धन को हरण करनेवाला होता है । पिशुन वह है जो उपकार करनेवाला से भी द्वेष करता है, निर्दोषी के विषय में भी प्रमाद फैलाता है और अपराध करके भी लज्जित नहीं होता है । विध्यापति ने कौशल, काशी, प्रयाग, नैमिषारण्य आदि तीर्थो में भ्रमण करते हुए भौगोलिक ज्ञान अर्जित करके भूपरिक्रमण नामक ग्रन्थ का निर्माण किया । इस ग्रन्थ में पैंसठ देशों का वर्णन है । कुछ गावों का वर्णन और एक तीर्थ से दुसरे तीर्थ की दूरी का भी हैं । इसमें वर्गित देशों और ग्रामों में प्रमुख है द्रुपददेश, स्वांभुव, कर्णपुर, चतुर्वेदपुर, रवरजरीपुर, लोलपुर, हस्तिनापुर, प्रयाग, मधु, इन्द्रपुर, चकोर नयनी, करेला , राजग्राम, वेणी, नाकदेश, काशी, हड्डिपाल, रामरेखा, सिद्धाश्रम, सोमलाली, हरपुर, श्रृंगवीर, सातमीपुर, दर्दुरकक्षेत्र, वलिग्राम, ताजपुर, चम्पारण देश, मणिहारी, नृसिंहपुर, पाटलिपुत्र, आरानपत्तन, हरिनामदेश, पाटलि, मिथिला , जनकपुर, हिजंगल, विश्वला, धनुष, महाग्राम इत्यादि । अस्तु यह पुस्तक विद्यापति का भौगोलिक यात्रा संस्मरण है । लेकिन ऐसा लगता है कि विद्यापति तीर्थो का वर्णन करके लोगों के हृदय में तीर्थो के प्रति श्रद्धा जगा दी है । इसी प्रकार से काल की गति के प्रभाव से लुप्तप्राय गया श्राद्ध को पुनरूज्जीवित करने के लिए विद्यापति ने 'गयापत्तलक' नामक पुस्तक को लिखकर तत्कालीन समाज मे श्राद्धपद्धिति के महत्व का प्रतिपादन किया । इसके अलावा उन्होंने शिव, दुर्गा आदि देवी देवताओं के साथ-साथ गंगा के प्रति तत्कालीन जनमानस भावनाओं को जगाने के लिए शिव विषयक शैव सर्वस्वसार, शैवसर्वस्व सार प्रमाण भूत पुराण संग्रह, दुर्गा विषयक दुर्गाभक्तिर्तरंगिनी एवं गंगा विषयक गंगावाक्यावली नामक पुष्तकों का प्रणयन किया । इतना ही नहीं उन्होंने मैथिली में दुर्गा स्तुति, शिव स्तुति, रांधाकुष्ण स्तुति, गंगास्तुति आदि स्तुति गीतों की रचना करके शिक्षित से अशिक्षित जनता के हृदय में भी धार्मिक भाव जागृत किया ।

इसी क्रम में जनमानस कवि विद्यापति ने देखा कि पत्रलेखन सम्बन्धी नियमावली का कोई मानदंड नहीं है । अतः इस अभाव को पूर्त्ति करने के लिए उन्होंने 'लिखनावली' नामक

पुस्तक की रचना कर ओइनवारकालीन मिथिला की शासन वयवस्था को व्यवस्थित स्वरूप प्रदान कर समाज के विभिन्न वर्गो के साथ-नियम -व्यवहार सम्बन्धी नियमावली को प्रस्तुत करने का स्तुत्य प्रयास किया है ।

यह पुस्तक अल्पज्ञ को ज्ञान हेतु, वहुज्ञ को प्रमोदार्थ एवं सज्जनों के लिए प्रीति प्रदर्शन को ध्यान मे रखकर लिखा गया है । इसमें उच्च, निम्न और समान श्रेणी के व्यक्तियों के साथ पत्राचार तथा नियम एवं व्यवहार सम्बन्धी लेखन पद्धति है :-

अल्पश्रुतोपदेशाय कोतुकाय वहुश्रुताम ।
विद्यापतिस्सतां प्रीत्यै करोति लिखनावलीम् ।।३।।
उच्चैः कक्षमधः कक्षं समकक्षं नरम्प्रति ।
नियमे व्यवहारे च लिख्यते लिखनक्रमः ।।४।।

उक्त पुस्तक के आधार पर तत्कालीन मिथिला का सामाजिक, राजनीतिक, आर्थिक जीवन का जीता जागता चित्र उभरकर आता है । इसक्रम में हम देखते हैं कि तत्कालीन मिथिला का एक आदर्श और आचारसंहिता प्रशंसनीय रहा है । उच्चकक्षा में सर्वप्रथम गुरू का स्थान दर्शाया गया है । गुरू का क्या गुण था । वे किन-किन नियमों का पालन करते थे उसका जिक्र विभिन्न पत्रों में किया गया है । इसी कारण से गुरू का आदर राजा भी करते थे । राजा समय-समय पर गुरू के आश्रम में धन-सम्पत्ति भेजते रहते थे । गुरू के साथ-साथ समाज में श्रेष्ठ जनों का भी आदर और सम्मान अनुकरणीय रहा है । विध्यापतिकालीन मिथिला में सामन्ती प्रथा थी । मिथिलाधिपति महाराजाधिराज और महासामन्ताधिपति कहालाते थे । उनके अधीन अनेक सामन्त रहते थे । समय-समय पर मिथिलाधिपति को अपने सामन्तों के साथ - साथ अन्यान्य सामन्तों से कलह भी हो जाता था । इससे ज्ञात होता है कि ओइनवारकालीन मिथिला में समय-समय पर राजनीतिक अस्तव्यस्तता होती रहती थी । तथापि मिथिलाधिपति में उदारता और प्रजा की भलाई करने की भावना कूट-कूट कर भरी हुई थी । इसलिए राजा कभी-कभी ग्राम भी बसाते थे और इस क्रम में विदेश से भी यहाँ आकर लोग बसते थे । एक बार राज्य की ओर से रौतपति को एक पत्र लिखा गया कि अपने राज्य में सभी प्रकार की सुविधाएँ विदेश से आकर बसनेवाले को दी जायेगी । इसपर रौतपति लिखते हैं कि आपने जो उजाड़ भूमि में वास के लिए आदेश दिया है, वह श्रीदेवपाद के प्रभुधर्म को सुनकर विदेश से आकर लोग स्वयं बस रहे हैं । वास्तविक बात यह है कि लोग जहाँ संरक्षण पाते हैं और जहाँ राजधर्म में स्थिरता पाते हैं, वहीं निवास करते हैं । इसलिए देश में लोग बस गए, यह विदित हो । इसके अलावा इस पत्र से ज्ञात होता है कि नये बसे लोगों को चौरों और शत्रुओं द्वारा कभी-कभी उपद्रव भी किया जाता था । लेकिन राज्याधिकारी को इसपर पूर्ण ध्यान रहता था । अतएव रौतपति समय-समय पर विदेशियों को कष्ट पहुँचानेवालें चोरों और शत्रुओं को कठिन दण्ड भी दिया करते थे ।

अस्तु, इससे ज्ञात होता है कि तत्कालीन राजा में परिपालन और संरक्षण करने की प्रवल भावनाएँ थी । यहाँ के राजाओं द्वारा शत्रुओं की ओर से पकड़े गए सैनिकों और राज्यधिकारी वर्ग के साथ अच्छे व्यवहार किए जाते थे । इसके अलावा यहाँ के राजा अपने सामन्तों पर अत्यधिक ध्यान देते थे । यदि उनके सामन्तों पर कोई आक्रमण करता था तो वे उन्हें धन और सैन्यवल से मदत करते थे । इसका फल यह होता था कि जिस समय मिथिलाधिपति पर यवनेश्वर का आक्रमण होता था उस समय में उनको सीमावर्ती मिगौं और अपने सामन्तें, द्वारा अनेक प्रकारों की सहायता मिलती थी । लिखनावली के पत्र सं० चौदह में एक सामन्त लिखते हैं कि यदि यवनेश्वर से सन्धि करें तो मैं धन और उपहार की वस्तुएँ भिजवाऊँ । यदि युद्ध करें तो सैन्य भिजवाऊँ और आदेश हो तो स्वयं आकर यथा योग्य कार्य करूँ । इस पत्र से स्पष्ट हो जाता है कि मिथिलाधिपति को यवनेश्वर से कलह भी हुआ था । लेकिन लिखनावली के अनेक पत्रों से स्पष्ट होता है कि कुल मिलाकर तत्कालीन मिथिला में सुख - शान्ति का साम्राज्य था ।

उस समय के न्याय-विभाग के सर्वोच्च अधिकारी को 'महाधर्माधिकरणीक' कहा जाता था । वे धार्मिक सन्देह के निर्णायक, वाचाल वादी के नियंत्रण में बद्धपरिकर, साधुजन को आनन्द देनेवाले, वेदान्त के सिद्धान्त से पवित्र मानस,कपट चातुर्यरूपी अन्धकार के लिए सूर्य के किरण स्वरूप एवं न्यायोचित सभी प्रकारों के गुणों से विभूषित रहते थे। उनका कार्य राज्य में धर्म के लिए सम्यक दृष्टि से न्याय करना था (लिखनावली पत्र सं०१७)।

महाधर्माधिकरणिक के अधीन में अनेक 'धर्माधिकरणिक' रहते थे । वे जहाँ न्याय करते थे उसे 'अधिकरण' कहा जाता था । वहीं पर वादी -प्रतिवादी मुकदमा करते थे । मुकदमा की सुनवाही के समय वादी प्रतिवादी के साथ -साथ साक्षी का भी वयान लिया जाता था । निर्णय में साक्षी के वयान का अधिक महत्व होता था । वल्कि साक्षी के वयान पर ही जीत हार निर्भर करता था । इसलिए यह नियम था कि :

यस्योंचुः साक्षिणः सत्यां प्रतिज्ञांविजयी भवेत् ।
अन्यवादिनों यस्य भवेत्तस्य पराजयः ।।

अर्थात् साक्षी जिसकी प्रतिज्ञा को सत्य कहें वही विजयी होंगे तथा जिसकी प्रतिज्ञा को झूठ कहें उसकी हार होगी । लेकिन साक्षी को यह सपथ - पुरस्सर कहाना पड़ता था कि मैं जो वयान दे रहा हूँ, वह सत्य है ।

वर्त्तमान में जो पंचायतीराज की स्थापना की गयी है उसकी शुरूआत विद्यापति के युग से पूर्व ही हो चुकी थी । कारण लिखनावली से ज्ञात है कि धर्माधिकरण के अतिरिक्त गाँवों में भी पंचों के द्वारा न्याय की व्यवस्था थी । वल्कि यह नियम था कि जिस झगड़े का निर्णय वादी अथवा प्रतिवादी को मान्य नहीं होता था । वही मोकदमा 'धर्माधिकरण' में किया जाता था ।

मिथिला में न्याय व्यवस्था सुधारात्मक थी, दंडित व्यक्ति इसके अलावा, कुछ मामला का निर्णय 'दिव्य' द्वारा किया जाता था। 'दिव्य' एक प्रकार का शपथ है। शास्त्रों में नौ प्रकारों की दिव्यों की चर्चा की गयी है :

घटोऽग्निरूदकञ्चैव विषं कोषश्चध पञ्चमम् ।
षष्टञ्च तण्डुलः प्रोक्तं सप्तमं सप्तमाषकम् ॥
अष्टमं फालमित्युक्तं नवम धर्मजं स्मृतम् ।
दिव्यान्येतानि सर्व्वाणि निर्दिष्टानि स्वयम्भुवा ॥।

आर्थात्, घट,अग्नि, जल, विषकोष, तण्डुल, माष(उरीद) फार, धर्मज नाम का दिव्य है।

'दिव्य' क्या है ? इसके विषय में कहा गया है कि मानव प्रमाण से अनिर्णित जो निर्णय हो वह लोकप्रसिद्ध 'दिव्य' कहलाता है। 'दिव्य' प्रमाण भावैकगोचर नहीं वल्कि यह भावभावविशेषणगोचर है। लिखनावंली (पत्र सं० ८१) में 'जलमज्जनदिव्य' का उल्लेख है। इस 'दिव्य' में व्यक्ति के प्रस्तरभाण्ड से सम्बद्ध कर गहरे जल में दे दिया जाता है। यदि डूब जाता था और पत्थर तैरने लगता था तब वह अपराधी होता था। लेकिन यदि पत्थर डूब जाता था और व्यक्ति तैरने लगता था तब वह शुद्ध अर्थात् अपराधी नहीं समझा जाता था। इसके अतिरिक्त 'जल मज्जन दिव्य' का एक दूसरा तरीका यह भी था कि इसमें व्यक्ति को पानी में बैठा कर तीन वाण छोड़ा जाता था और तब यदि उसे वाण नहीं लगता था तब वह शुद्ध अर्थात् निरपराधी माना जाता था। मिथिला में न्याय व्यवस्था सुधारात्मक थी। दंडित व्यक्ति को सुधरने का मौका दिया जाता था। लेकिन जिसमें सुधारने की क्षमता नहीं थी, उन्हें प्राण दंड दिया जाता था। इसके अतिरिक्त न्याय में एकरूपता थी। इसमें राजा और रंक में कोई भेदभाव नहीं किया जाता था।

तत्कालीन समाज दो वर्गों में बटा था। एक वर्ग धनी-मानी था तो दूसरा वर्ग अकिंचन। एक वर्ग उत्तमर्ण था तो एक वर्ग अधमर्ण। अधमर्ण को कर्ज लेने के समय जामिनी की जरूरत पड़ती थी। तीन प्रकार के यामिनी होते थे – प्रत्यायकलग्नक, दर्शनलग्नक एवं दातृलग्नक। इसके अलावा शिवलिंग का स्पर्श करके भी ऋण लेता था। ऋण लेनेवाला शिवलिंग को स्पर्श कर कहता था कि यदि समय पर मैं ऋण नही दूँगा तो मेरा अनिष्ट हो जाएगा।

तद्युगीन मिथिला के कुछ लोगों का व्यवसाय व्यापार करना था। उस युग में व्यापार स्थल और जल दोनों मार्ग से होता था। अन्तर्देशीय व्यापार के साथ -साथ वैदेशिक व्यापार भी होता था। समाज के कुछ लोग नदी में घटवारी और कुछ लोग हाट पर वस्तुओं को बेचकर अपनी जीविका चलाते थे। इसमें से एक को 'घट्टोपजीवी' कहा जाता था तो दूसरे को हट्टोपजीवी।

तत्कालीन मिथिला मे धार्मिक कट्टरता नहीं थी। लोगों मे सहिष्णुता थी। एक सम्प्रदाय से दूसरे सम्प्रदाय के लोगों में वैमनस्य नहीं था। इसी कारण से महाकवि विद्यापति विभिन्न देवी देवताओं का एकात्मक रूप को निरूपित कर समाज को विश्रृंखलित होने से बचाने का स्तुत्य प्रयास किया।

तत्कालीन मिथिला नरेश के यहॉ धर्मकर्म को देखने के लिए अनेक अधिकारी रहते थे। राज्य मे यजन-याजन एवं शान्ति स्थापनार्थ एक अधिकारी विशेष रहते थे। उन्हें 'शान्तिकरैणिक' कहा जाता था। देव-मन्दिर की व्यवस्था के सर्वोच्च अधिकारी को'महादेवागारिक' कहा जाता था।

अन्ततोगत्वा, मैं यही कहूँगा कि लिखनावली तत्कलीन मिथिला के समाजिक, आर्थिक, राजनीतिक, धार्मिक एवं सांस्कृतिक जीवन का 'अलवम' है

इसलिए मैं विद्यापतिकृत लिखनावली का प्रचार -प्रसार के लिए हिन्दी अनुवाद पाठकों के समक्ष प्रस्तुत कर रहा हूँ। इस पुस्तक के प्रकाशन में गुरुवर डॉ० दिनेश कुमार झा का जो स्तुत्य सहयोग मुझे प्राप्त हुआ है, तदर्थ मैं उनके प्रति अपना आभार प्रकट करता हूँ।

इन्द्रकान्त झा
पटना कालेज, पटना

अथ विद्यापतिकविकृता लिखनावली

भूत्यर्थिनान्नम्रसुरासुराणा-
मुत्तंसरत्नाञ्चितपादपद्मम् ।
तन्नौमि लम्बोदरमाप्रसादं
यस्मिन् प्रसन्ने सकलार्थसिद्धिः ॥१॥

सर्वादित्यतनूजस्य द्रोणवारमहीपतेः ।
गिरिनारायणस्याज्ञां पुरादित्यस्य पालयन् ॥२॥

अल्पश्रुतोपदेशाय कौतुकाय बहुश्रुताम् ।
विद्यापतिस्सतां प्रीत्यै करोति लिखनावलीम् ॥३॥

उच्चैःकक्षमधःकक्षं समकक्षं नरम्प्रति ।
नियमे व्यवहारे च लिख्यते लिखनक्रमः ॥४॥

तत्रादौ उच्चैःकक्षलिखनानि

स्वस्ति । गुरुषु परमदैवताधिदैवतेषु, परमाराध्येषु, आचारचारुत्वचमत्कारित्वचतुर्म्मुखमानसेषु, विद्यानिर्ज्जितवसिष्ठादिनावहेषु, महामहोपाध्याय श्रीदेवदत्तमहाशयेषु, अमुकग्रामात् अन्तेवासिनः श्रीअमुकस्य मेदिनीमिलिताष्टाङ्गस्य प्रणामपत्रीयम् । श्रीमच्चरणानामनुकम्पया कुशलमत्र । गोचरश्च - श्रीमच्चरणसकाशादधीतव्याकरणोऽहमनध्यायमधिगत्य दिनकतिपयं गृहमागतोस्मि । सम्प्रत्ति प्रत्यासन्ने स्वाध्याये तत्रागत्य शास्त्रमध्येतुमिच्छामि । तेन द्रव्यगुणलीलावतीकुसुमाञ्जलिपुस्तकान्यादर्शत्वेन मयि सन्देष्टुमादेष्टव्यानि । किम्बहुन । पत्रचिह्नार्थं नारिकेलफलचतुष्टयं प्रहितमस्तीति । तत्र प्रहितफल ४ ॥१॥

अपरः प्रकारः

स्वस्ति । अमुकनगरे गीर्व्वाणवाणीगुणोदयपरितोषितसमस्तबुधजनमनोवृत्तिषु कुन्दावदातकीर्त्तिषु सन्मिश्रश्रीमदमुकशर्म्मणां पादपङ्केरुहेषु अमुकग्रामात् श्रीअमुकस्याऽवनतशिरसः प्रणामपत्रीयम् । विज्ञापनञ्च—

श्रीमच्चरणेभ्यो विहितविद्योपादानप्रतिष्ठार्थं गुरुदक्षिणात्वेन प्रहितम्मया सुवर्णशतं तच्चानुग्रहेण संग्रहणीय श्रीगुरुचरणैरिति ।।२।।

स्वस्ति। वाराणस्यां श्रीवीरेश्वरमठेषु वेदान्तसिद्धान्तशुद्धान्तःकरण-वृत्तिषु, यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधीत्यष्टाङ्ग-योगाभ्यासवशीकृतसकलेन्द्रियवर्ग्गेषु, त्रिदण्डपरिव्राजकाचार्य्यश्रीमदमुकचर-णेषु राजधानीतः राजश्रीअमुकदेवानां दण्डवत्प्रणतिशतबोधयित्री पत्रीयम्। श्रीमच्चरणानामनुकम्पासम्पादितशुभाशीःप्रसादात् कुशलिनामस्माकं परि-वारेषु मङ्गलं, जनपदेषु शुभाचारः, सैन्येषु सामर्थ्यं, भृत्येषु पवित्रता, शत्रुषु दर्प्पहानिः, कोषागारेषु दोषाभावः, इति सौमनस्यमङ्गीकृतं करणीयम्। सकलसामग्रीसम्पत्तिवार्त्तयास्माकं मनसि सौमनस्यं समर्प्पणीयं प्रयोजनञ्च श्रीमच्चरणानां तीर्थवासिनां (ता) भिक्षासौकर्य्यार्थं सुवर्णशतत्रयं प्रहितमस्ति यत्र (प्रहित) सुवर्णपल १०, एतच्चानुग्रहेण परिग्रहीतुं सन्निधानवर्त्तिषु स्नातकवर्गेष्वाज्ञा कर्त्तव्या तेन तेऽस्मन्नाम्ना भिक्षावस्तूनि कारयित्वा यथाकालमुपनयन्ति। पत्रचिह्नार्थं प्रहित नेपालकम्बल १, शीश-कमण्डलु १ किम्बहुनेति ।।३।।

स्वस्ति। परमाराध्येषु पैशुन्यपरित्यागपवित्रेषु, प्राणधारणकारणस्वी कृताष्टग्रासशकलेषु, श्रीमन्महेश्वरध्यानपरायणमानसेषु, जटाभस्मकपालाभि-सन्द्योतितपाशुपताश्रमपरिग्रहचिह्नेषु, परमतपश्शीलपरममाहेश्वरतत्त्वज्ञान-सम्पन्नगुरुवरश्रीअमुकचरणेषु, अमुकग्रामात् मिश्रश्रीअमुकानामष्टाङ्ग-प्रणतिपत्रीयम्। शिवधर्मादिसकलतश्चरणपरायणाः श्रीमन्तः सर्व्वदा काश्यां तिष्ठन्ति यदा चाहन्तेन पथा समायातस्तदा श्रीमच्चरणैः करुणा-वरुणा लयैर्म्मय्याशिषो दत्ताः तत्फलमिदानीमहं धनवान् पुत्रवान् आयुष्मान-स्मीति निवेदितं भिक्षासामग्री च श्रीमच्चरणान्तेवासिश्रीकरुणाकरब्राह्मण-द्वारा कियत्यपि प्रहितास्ति। सानुग्रहेण परिग्रहणीया। किम्वहुनेति ।।४।।

स्वस्ति। परमाराध्येषु निरुपाधिस्नेहसम्पादितपोषणवर्द्धननयविनय-शिक्षाप्रबोधप्रभुषु श्रीमत्तातचरणेषु अमुकग्रामात् श्रीअमुकस्याऽष्टाङ्गप्रणति-पत्रीयम्। श्रीमच्चरणनां शुभाशंसनानुभावेन कुशलमत्रेति सौमनस्यं विधा-तव्यम्। स्वकीयकुशलोदन्तेन मच्चेतसि परमानन्दः समर्प्पणीयः। प्रयोज-नञ्च—श्रीमच्चरणानामाज्ञां शिरसि निधाय यदर्थमहमागतोऽस्मि तत्कार्य्यं

सम्पन्नकल्पम् । द्वित्राणि दिनान्यत्र स्थित्वा कार्य्यन्निर्व्वाह्य तत्राहमागतप्रायोऽस्मि । ततो मन्निमित्ता चिन्ता न कर्त्तव्या । किम्बहुनेति ॥५॥

स्वस्ति । परमाराध्येषु संसारोत्पत्तिकारणाद्भूतार्थं प्रतिदिनपूजार्हासु श्रीमन्मातृठक्कुरराज्ञीषु अमुकग्रामात, श्रीअमुकस्य भवच्चरणपांशुप्लावितशिरसः प्रणामपत्रीयम् । श्रीमतीनामाशीर्द्दानात् कुशलमिह । तत्रत्यं कुशलं समोहे । विज्ञापनञ्च— यदारभ्य विदूरे तिष्ठामस्तदारभ्य राजसम्मानमनुभवतामप्यस्माकं चेतसि सौमनस्यं भोजनसिद्धिन्नं जायते । यतो येन श्रीमच्चरणानां वात्सल्यमनुभूतं तस्य कुतोऽन्यत्र वृत्तिः । मातृगुणाः किं वक्तव्याः । यतो गङ्गापि मातरित्यभिधाय स्तूयते । ततस्तत्राहमागतप्रायोऽस्मि । विदूरस्थेऽपि मयि मन्निमित्ता कापि चिन्ता न कर्त्तव्या । शुभाशंसनमात्रं विधेयम् । किम्बहुनेति ॥६॥

स्वस्ति । परमाराध्येषु ज्येष्ठभ्रातृषु स्नेहमान्यतोभयव्यतिकरविश्राममहीरुहेषु पितृकल्पेषु ठक्कुरश्रीअमुकमहाशयेषु अमुकग्रामात् श्रीअमुकस्य प्रणामशतपत्रीयम् । श्रीमद्भ्रातृचरणानां स्नेहातिशयात् कुशलमत्र । तत्रत्यञ्च तदीहे । कार्यञ्च निगलबद्धशूद्रस्य अमुकस्य विमोक्षणाय तदादिष्टं तदयं यद्यपि ममापथ्यकारी, मया परमक्रोधेन कार्यतया च बद्धः तथापि श्रीमच्चरणानां लिखनमतिक्रान्तुन्न शक्नोमीति लिखनदर्शनादेवायं मया बन्धमोचितः । तदित्थं सर्वदापि मय्याज्ञाकारिणि स्नेहसन्ततिर्न्न परित्यक्तव्येति ॥७॥

स्वस्ति । अमुकपत्तने उद्दण्ड-पाटमुकुट-सिंहासनछत्रचामरेत्यादि-समस्तप्रक्रियाविराजमानमहाराजाधिराजश्रीमदमुकदेवपादपद्मेषु समरविजयिषु अमुकनगरात् दलपति श्रीअमुकसिंहस्य मौलि-मिलित-करयुगलस्य प्रणामपत्रीयम् । श्रीमद्देवपादानामतुलप्रतापोदयात् कुशलमत्र । गोचरस्तु यैरागत्य विपक्षसामन्तैरस्मदीयसीमनि भूमिराक्रान्ता तेषु मया ध्राटकं कृतं तैरग्रेगता अस्मदीययोधाः शरासारैः पराङ्मुखीकृताः । तत्र पश्चान्मया गत्वा तैः समं युद्धं कृतम् । युद्धे क्रियमाणे बहवः शत्रुपक्षपदातयः साटोपगजघटाघोटकपदाघातैरेव चूर्णीकृताः । समरस्थले शोणिततरङ्गिणी वाहिता । श्रीमत्प्रतापोदयान्मया जितमिति विपक्षशिरोभिरेव गोचरीभविष्यति अस्मद्बलेऽपि ये योधाः समरे पतिता ये च क्षतिनो भूताः तेषांपत्ता लिखित्वा प्रहितैवास्ति । तदेतेषु प्रभुधर्म्मेण सत्कर्त्तुमुचितायते । तद्विधाने श्रीमद्देवपादानां प्रभुधर्म्मः प्रमाणम् । किम्बहुनेति ॥८॥

स्वस्ति । प्रबलतरप्रतापार्कनिरस्तरिपुतिमिरसंहारनिरवद्यराजनीति-कल्लोलिनीकर्णधार-मर्य्यादापारावार-संग्रामसीमादुर्व्वारानेकराजचूडालङ्का-रमणिमयूखमञ्जरीपिञ्जरीकृतचरणारविन्द — हृदयदेशनिवेशितगोविन्द-रिपुराजकंसनारायण-भवभक्तिपरायण-महाराजाधिराज - श्रीमदमुकदेवपाद-पद्मेषु समरविजयिषु अमुकस्थानात् सेनापतिश्रीअमुकस्य सिंहासनतलकृत-शिरसः प्रणतिपत्रीयम् । श्रीमद्देवानां प्रतापोदयात् कुशलमत्र । विशेषस्तु—समागतस्वहस्तपत्रं शिरसि निधार्य सम्यक् समधिगतार्थं कुर्व्वन्नस्मि । गोच-रस्तु—श्रीमान् यवनराजः सम्प्रति गौडेश्वरमुद्दिश्य कृतप्रयाणो दिल्लीतश्च-लितोऽस्तीति चारपुरुषेणागत्य कथितमस्ति । गौडेश्वरोऽपि दुर्गप्राकारपरि-ष्कारव्याकुलः सेनासङ्घटनपरायणश्च विद्यते । युद्धं करिष्यति सन्धानं वेति न ज्ञायते । ज्ञात्वा च पश्चाल्लिखिष्यामि । सम्प्रति (यदुचितं) तद्विधातुमादे-ष्टव्यमिति । किं बहुनेति ॥९॥

स्वस्ति । प्रचण्डप्रतापप्रभातिरस्कृतरिपुतिमिरसङ्घातमहामहोत्सवेषु दयादानदाक्षिण्यमर्य्यादाविवेकादिसकलराजगुणालङ्कृतेषु वसुवितरणकथाक-निष्ठीकृतबलिकर्णप्रभृतिवदान्यचक्रेषु वसुन्धराचक्रेषु निजनिखिलविरुदावली-विराजमानमहाराजाधिराजश्रीमदमुकदेवचरणयुगलेषु संङ्ग्रामशतविजयिषु अमुकस्थानात् रौतपति श्रीअमुकस्य सिंहासनतलकृतशिरसः प्रणामशतपत्री-यम् । श्रीमच्चरणानां प्रतापोदयात् कुशलमत्र । विशेषतस्तु समागतस्वहस्त-पत्रं शिरसि निधाय सम्यक् समधिगतार्थं कृतवानस्मि । उज्जटभूमिवासार्थं यदादिष्टं (तत्) श्रीमद्देवरादानां प्रभुधर्म्मं श्रुत्वा विदेशादागत्य लोकाः स्वयमेव वसन्तस्सन्ति । लोकास्तु यत्रैव परिपालं पश्यन्ति, यत्र च प्रभुधर्म्म-स्थेयताञ्च, तत्रैव वसन्ति । तेन देशे वासो वृत्त इति गोचरितम् । ये चात्र प्रत्यूहमाचरन्तो दृष्टास्ते विपक्षाश्चौराश्च मयैव व्यापादितव्याः । देशवासे दुर्व्वृत्तमारणे च मम कौशलमात्रं, प्रतापस्तु श्रीमद्देवपादानामेव क्रिया-साधकः । किं बहुनेति ॥१०॥

स्वस्ति । परमोदित्वरप्रतापार्कसम्पर्कसन्तापितरिपुनृपतिसेनाशोभा-कोटिषु अनवरतवसुदानवशीकृतसकलविद्वज्जनमानसेषु समस्तप्रक्रियाविराज-मानेत्यादिमहाराजाधिराजश्रीअमुकदेवसिंहपादारविन्देषु समरशतविजयिषु राजधानीतः शान्तिकरणिक श्रीमदमुकदत्तानां शुभाशंसनपूर्व्वकविज्ञापन-पत्रीयम् । श्रीमत्प्रतापोदयात् कुशलमत्र । तत्रत्यकुशलं श्रीमद्देवपादानां

चतुरङ्गबलोपेतानां समीहे। गोचरस्तु अत्र च ब्रह्मपुरब्राह्मणाः कृतवरणाः अग्निहौत्रिक श्री (अमुक) आवसथिक श्रीअमुकशुक्ल श्रीअमुकमिश्र श्री-अमुकमहामहोपध्याय श्रीअमुकप्रभृतयो दुर्गापाठमन्त्रजपं नवग्रहहोमञ्च कुर्व्वाणाः चतुर्व्वेदिश्रीमदमुकत्रिपाठी श्रीअमुकद्विवेदी श्रीअमुकप्रभृतयो घनजपं सामगानं संहिता पाठञ्च विदधानास्सन्ति। तेन मच्चरणानां रिपु-जयार्थिनां शुभयात्रादिनादारभ्य स्वस्त्ययनं भद्ररूपेण भवदस्तीति गोचरितम्। वयमाशास्महे यत्सङ्ग्रामं निर्ज्जित्य रिपुनृपतीन्निराकृत्य रिपुधानान्यादाय रिपुराज्यमतिक्रम्य श्रीमद्देवपादानता वयं (?) प्रभुरपि त्वरितमिहागत्य दक्षिणासुवर्णैरिमां द्विजमण्डलीमर्च्चयत्विति ॥११॥

स्वस्ति। सन्धिविग्रहयानासनद्वैधाश्रयतेत्यादिषड्गुणोपपन्नचातुर्य-चतुराननेषु प्रचण्डदण्डनीतिनिराकृतसकलदुर्व्वृत्तप्रभावेषु अक्षयस्थानत्रिवर्ग-संसर्गसावधानमतिषु राजकोषवर्द्धनविवर्त्तनर्नात्तितशेमुषीविभवेषु उक्तिमाधु-र्य्यकार्य्यकर्क्कशतापरामर्षपरिच्छेदपरपक्षविभेदवर्त्तमानकर्त्तव्यता सावधान-समस्तप्रक्रिया - विराजमानमहामहत्तकठक्कुरश्रीअमुकमहानुभावानां चर-णारविन्दयुगलेषु अमुकग्रामात् कार्य्यि-श्रीअमुकस्य भृङ्गायमानशिरसः साष्टाङ्गप्रणतिपत्रीयम्। समागतलिखनार्थः समधिगतः। देशेऽस्मिन् यत्र यत्र राजस्वमासीत् ततस्ततस्समादायास्माभिः श्रीमद्गोचरपूर्व्वकं पात्रे प्रवे-शितम्। यद्यद्दानपत्रमायातं तत्तत्प्रमाणीकृत्य राउत्तपदातिषु दत्तम्। यत्र परिशेषीभूतं क्वापि क्वापि किमप्यस्ति तन्निस्थानमेव मृतपलायितप्रमुखपद-विश्रान्तम्। ततस्तु गोचरप्रहितपत्तामागत्य करिष्यामि। तत्रापि मुद्रासहस्र-द्वयं यत्प्राप्तं तदमुकद्वारा प्रहितमस्ति। यत्र मुद्रा २०००। संवाहवस्तूनि प्रहिताप्तद्वारैव गोचरीभविष्यन्ति। इति ॥१२॥

स्वस्ति। श्रीकरणे परमावेक्षकेषु दण्डनीतिपाण्डित्यमण्डितेषु धर्म-रक्षापूर्वकराजकार्यचातुर्यचाणक्येषु समस्तप्रक्रियाविराजमानमहासामन्ता-धिपतिमहामहत्तकठक्कुरश्रीअमुकमहाशयानां चरणकमलेषु अमुकविषयात् ओसथि श्रीअमुकस्याष्टाङ्गप्रणतिपत्रीयम्। श्रीमत्प्रतापोदयात् कुशलमत्र। विशेषस्तु—अत्र कर्षिणः पूर्व्ववर्षपञ्जीप्रामाण्येन प्रजाभ्यः कपर्द्दकं प्रार्थ-यन्ति। अत्र च कस्मिन्नपि ग्रामे संस्थान मस्ति, कोऽपि ग्रामो निस्थान एव। ततो यद्यस्मिन्वर्षे देशेऽस्मिन भूमिमापनं कृत्वा राजकरो गृह्यते, तदा करकपर्द्दकः सम्पूर्ण एव प्राप्यते, क्षीणानां पीड़ा न भवति। इति तु राजाज्ञां

विनाधिकारी कर्त्तुं न्न शक्नोति। इति सरूपं गोचरितम्। ततो यथा करिष्यामि तथाऽऽदेष्टव्यम्। किं बहुनेति ॥१३॥

स्वस्ति। परमावेक्षकेषु: दण्डभेदसामदानोपायचतुष्टयचातुर्यविशिष्टमतिषु प्रभावोत्साहमन्त्रेतिशक्तित्रयविश्राममहीरुहेषु राज्यरक्षापरामर्षोत्कर्षविधायकेषु सप्रक्रियमहासान्धि-(विग्रहि)-कठक्कुरश्रीअमुकेश्वरमहाशयेषु अमुकग्रामात् सामन्तश्रीअमुकस्याष्टाङ्गप्रणतिपत्रीयम्। शिवमिहान्यच्च मया श्रुतम् राजकोपो मयि विद्यते। यद्यपि प्रकोपनिमित्तं न जानामि तथापि-दुर्ब्बोधं राजचरित्रमिति प्रकोपवार्त्तां श्रुत्वा शङ्काकुलितमानसोऽहं तत्रागन्तुं बिभेमि। ततो यदि निर्णयराजलिखनमेकं स्वकीयलिखनञ्च प्रहीयते, तदा निश्शङ्को भूत्वा सन्निधानमागच्छामि। किं बहुनेति ॥१४॥

स्वस्ति। श्रीकरणे शौर्यधैर्यमर्यादाविवेकविचारपरमोपकारधर्मरक्षापूर्वकराजकार्यकक्कंशतेत्यादिसकलशिष्टगुणालङ्कृतेषु स्वपक्षपरपक्षवार्त्ताज्ञानसमयकर्त्तव्यसमवधानकृत्यसन्देहपरिच्छेदकोषवर्द्धनशक्तिप्रभृतिमन्त्रिमन्त्रणाकुशल— परिपाटिपटुतरव्हापारेत्यादिसत्रक्रियसान्धिविग्रहिकठक्कुरश्रीअमुकेश्वराणाञ्चरणकमलेषु अमुकग्रामात् सेनापतिश्रीअमुकस्याष्टाङ्गप्रणतिपत्रीयम्। श्रीमत्प्रतापोदयात् कुशलमत्र। कार्यञ्च—राउत्तपदातिपरिग्रहाय श्रीमद्देवपादैः श्रीमद्भिर्य्यदहम् प्रहितोस्मि, ततो मया स्वदेशीया विदेशीया नानासङ्ग्रामलब्धयशसो नानाशस्त्रकृताभ्यासाः शूराः कुलीनाः स्वामिभक्ताश्चास्नायिकः सुरुकिचौहानचन्देलप्रभृतयश्चाटुकारेण प्रत्याशादानेन चानुरञ्जिताः सन्ति। एते च श्रीमद्देवपादानां श्रीमहाशयानाञ्च विवेकविचारपरमाप्तजनवात्सल्यञ्चाकर्ण्य तत्रागन्तुमुन्मुखाः कृतास्सन्ति। यद्यमीषां रूपगौरवक्षापूर्व्वकं योग्यजीव्यस्थैर्य्यं भवतिमम सेवकस्य (च) वचनन्न व्यभिचरति, तदेतान्नीत्वा तत्र गच्छामः। एतेषां तत्र गमनेन स्वपक्षोत्कर्षः परपक्षापकर्षश्च सम्भवति। तदत्रावधारणं कर्त्तुमवलोकनीयम्। किं बहुनेति ॥१५॥

स्वस्ति। अमुकनदीतटावस्थितकटके प्रभुषु प्रतापोदयोद्योतितसकलदिङ्मण्डलेषु अनेकराजावलीमौलिकमुकुटमणिप्रभारञ्जितचरणारविन्देषु समस्तेत्यादिश्रीअमुकदेवपादेषु राजधानीतः समस्तप्रक्रियाविराजमानमहासामन्ताधिपतिमहामहत्तकठक्कुरश्रीअमुकशर्म्मणां शुभाशीःपूर्व्वकविनय

विज्ञापनपत्रीयम् । श्रीमत्प्रतापोदयात् कुशलमत्र । तत्रत्यं श्रीमद्देवपादानां गजतुरगरथपदातिचतुरङ्गबलसहितानां कुशलमाशास्महे । कार्य्यञ्च यदा श्रीमद्देवपादैरितः प्रयाणं कृतम्, तदारभ्य समस्तराज्यकार्य्यं श्रीमद्देवपादानां पुण्योपचयात् भद्रक्रमेण चलदस्ति । ये चाधिकारिणः साध्यशेषनिमित्तं ये च सापराधा दण्डशेषनिमित्तं कारागारे बद्धास्सन्ति यावच्छक्ति तैर्द्दत्तमेव । अतःपरं ते परमदुर्गताः प्राप्तयातनाक्लेशाः अपि किमपि दातुन्न शक्नुवन्ति— म्रियन्ते परम् । ततो यदि करुणयादेशप्रसादो वा तदामीषां देयवस्तुनि परिच्छेदः क्रियते । परिच्छिन्ने प्रतिभुवो गृह्यन्ते । शृङ्खलबन्धनादेते विमोच्यन्ते, तदा किञ्चिद्धनप्राप्तिरपि भवति । प्राणिवधवारणञ्च सम्भवतीत्यास्माभिर्गोचरितम् । राजधर्म्मेण यदर्हति, तल्लिखितुमादेष्टव्यम् । संवाहवस्तुनि पत्ताप्रमाण्येन प्रहितपुरुषद्वारा गोचरीभविष्यत्येवेति ।१६।।

स्वस्ति । धर्म्मसन्देहनिर्णायकवाचालवादिप्रबन्धबद्धसाधुजनमोददायकवेदान्तसिद्धान्तशुद्धान्तःकरणकपटपाटवतिमिरभास्करकिरणसप्रक्रिय - महाधर्म्माधिकरणिकठक्कुरश्रीअमुकेश्वरचरणेषु अमुकग्रामात् श्रीअमुकेश्वराणां बहुविनयपूर्व्वकनमस्कारपत्रीयम् । कुशलमत्र कार्यञ्च यद्यपि श्रीमन्तो धर्म्मार्थमेव समदृष्ट्या विचारयन्ति, न द्वेषं न च पक्षपातं धारयन्ति तथाप्यमुकामुकशर्म्माणौ वादिप्रतिवादिनौ गच्छन्तौ तिष्ठतः सिद्धान्तमनयोर्व्विवादं विचार्य्यं जयिने जयपत्रमादेष्टव्यं, किमपरमिति ।।१७।।

स्वस्ति । स्वरवर्णमर्य्यादापरतन्त्रमन्त्रपाठविचक्षणेषु सुविदितगुण्यगुणिलक्षणेषु मखसहितक्रियाकलापपरिपाट्यप्रमादिषु शास्त्रसिद्धान्तवादिषु प्रतिष्ठितपुरोहितमहामहोपाध्यायश्रीअमुकचरणेषु अमुकग्रामात् श्रीअमुकशर्म्मणो विनयशतोपनेत्री नमस्कारपत्रीयम् । श्रीमतां शुभाशंसनात् कुशलमत्र । तत्रत्यकुशलं समीहामहे । कार्यञ्च श्रीमन्तः सम्प्रति राजपुरोहितपदव्यां विराजन्ते । सम्प्रति मम पुत्रावधीतशास्त्रौ प्रज्ञाप्रवीणौ च तत्र राजस्थाने भिक्षार्थं गच्छन्तौ वर्त्तेते । तदनयोर्गुणानाचारान् कुलशीलञ्च परीक्ष्य समुचितभिक्षालाभः कारयितव्यः । तेनास्मदीया पूर्व्वप्रत्यासत्तिः फलवती भवति । किं बहुनेति ।।१८।।

इति श्रीविद्यापतिविरचिता-लिखनावल्यां उच्चैः कक्षपरिपाटिर्न्नामानुक्रमणिका प्रथमः ।।

□

अथाधःकक्ष लिखनानि

स्वस्ति । अमुकपत्तनात् दण्डपाटमुकुटसिंहासनश्वेतातपत्रसितचामरेत्यादिसमस्तप्रक्रियाविराजमाननृपतिमुकुटमाणिक्यकिरणारुणनखमयूखरिपुराजद्विरदपञ्चाननिजकीर्त्तिकौमुदीबोधितकुमुदकाननेत्यादिमहाराजाधिराजश्रीमदमुकसिंहदेवपादाः समरविजयिनः परमावदातचरितान् राजश्रीअमुकान् संवादयन्ति । सम्प्रति यूयं करिष्यमाणक्रियमाणक्रमेण सेवां न कुरुथ, दीयमानक्रमेण करन्न दत्थ नैरपेक्षमाचरथ । किमिदं साम्प्रतमपि यदि स्वहितमिच्छथ, तदा प्रत्यब्ददीयमानकरं श्रीकरणे प्रविष्टं करिष्यथ, सेवार्थं स्वकीयपुत्रं भ्रातरं वा समुचितसैन्यसमेतं प्रहेष्यथ । यद्येवं न कुरुथ, तदा यत्र जीवथ, तत्र यास्यथ । नो चेत्प्रयाणं कृत्वा करितुरगपदातिपदाघातैरेव युष्माकं दुर्गं चूर्णावशेषीकृत्य युष्मान् सुभटकोटिशरव्यापारैरचिरादेव यमपुरं प्रहेष्याम इति ॥१६॥

स्वस्ति । अमुकनदीतटावस्थितकटकात् प्रचण्डप्रतापतपनतापिताशेष वैरिभूपालसारमर्य्यादापारावारनीतिनिष्णातव्यवहारकामिनीकण्ठहाररिपुराजदैत्यनारायणकंसारिचर्चापरायणशरणागतरक्षावज्रपञ्चरसमरसीमावष्टम्भसम्भावनास्पर्द्धितकुञ्जरसमस्तप्रक्रियाविराजमानमहाराजाधिराज श्रीमदमुकदेवपादाः समरविजयिनो राजश्रीअमुकान् संवादयन्ति । (वयं श्रीअमुकदेवपादानां चरणप्रपन्ना एव सेवां कुर्व्वाणाः करन्ददानाः तिष्ठामः तथापि कथमस्माकमुपरि प्रयाणं कृतमस्ति इति यल्लिखितं तत्र भवन्तः श्रीमन्तः) शुद्धेन मनसास्मच्चरणानां सेवां न कुर्व्वन्ति, न स्वविभवानुरूपकरं प्रयच्छन्ति, तेनास्माभिः प्रयाणं कृतमस्ति । साम्प्रतमपि यदि स्वहितमिच्छथ तदा दश हस्तिनः, पञ्चाशल्लक्षाणि धनानि, शतमश्वान् प्रहेष्यथ । तेन स्वयं सुखेन स्थास्यथ । यदि तथा न कुरुथ, तदा वयमागच्छन्त एव तिष्ठामः । यूयं यत्र जीवथ, तत्र गिरिदुर्गाभ्यन्तरे गत्वाश्रयथ, सन्धिष्यथ ॥२०॥

स्वस्ति । धर्माधिकरणात् सप्रक्रियमहाधर्म्माधिकरणिकठक्कुरश्रीअमुकचरणा (राउत्त) राजश्रीअमुकान् समादिशन्ति—अत्र महामहोपाध्यायश्रीदेवदत्तानां गतदासविवादे दासीप्राणिचतुष्टयमसावतिक्रम्य धृतवानतो भोग्यसहितं ददात्वित्यर्थभाषायां भवता मिथ्योत्तरं दत्तम् । मिथ्योत्तरे

पूर्व्ववादिनः प्रत्यर्थिदिशि प्रमाणगवेषणायामर्थिनामुकशर्म्माणौ साक्षिणावुपन्यस्तौ भवता स्वीकृता च । तावादाय साम्प्रतमर्थिव्यवस्थापितदिवसेऽत्रोपस्थित इति मत्वा यूयमत्रागत्य साक्षिनिगदं श्रोष्यथ । यदि नागमिष्यथ, तदाऽर्थापत्तिलभ्य एव युस्माकं पराजयो भविष्यतीति यूयं सत्वरमत्रागमिष्यथेति ॥२१॥

स्वस्ति । श्रीकरणात् समस्तप्रक्रियाविराजमानमहासामन्ताधिपतिमहामत्तकठक्कुरश्रीअमुकेश्वरमहानुभावचरणाः चातुर्द्धरिकश्रीअमुकान् संवादयन्ति । अस्मिन् राज्ये सर्व्वैरधिकारिभिः स्वस्वदेशस्य करधनं निश्शेषीकृत्य प्रहितम् । युष्माकं देशे बहुतरं साध्यशेषधनं विद्यते, तद्धनं कथन्न प्रस्थाप्यथ, कार्य्यपुरुषाणां कार्य्यंचातुर्य्यंफलं धनमस्ति, यदि धनन्न याति तदा कुताश्चातुर्य्यं कुत आपृत्वं (आप्तत्वम् ?) वा यदि वा सकलं धनं तद्देशीयं युष्माभिः करणे पौत्रकपत्रीभ्यां प्रवेशितमेव विशेषो नास्ति तदा पञ्जीमादाय लेखमागत्य करिष्यथेति ॥२२॥

अमुकराजधानीतः समस्तप्रक्रियाविराजमानमहासामन्ताधिपतिमहामहत्तकठक्कुरश्रीअमुकचरणाः लेखिश्रीअमुकान् संवादयन्ति - अमुकपरिगणायाः साध्यशेषजिज्ञासार्थं यूयं गताः तत्राद्यपर्य्यन्तं किं कृतमस्तीति लिखित्वा प्रहेष्यथ चातुर्द्धरिकस्य गृहीतं भक्षितमुपेक्षितं पञ्जिकारस्य प्रमादनष्टं देशसाधितप्रामाण्येन राजस्वं वर्त्तुलीकृत्य राशिर्ज्ञातव्यः । ततस्तां पञ्जिकां नियोगिपाञ्जिकौ च नीत्वाऽत्रैवागन्तव्यम्, तेनात्र करण एव स्वदेशपञ्जिकाराशौ साध्यशेषजिज्ञासां कृत्वा ग्राह्यग्रहणं क्रियत इति ॥२३॥

स्वस्ति । समस्तप्रक्रियाविराजमानमहामत्तकठक्कुरश्रीअमुकमहाशयाः चाढ़श्रीअमुकं समादिशन्ति । समागतपत्रिकार्थस्समागतः । त्वया निरपराधानां साधूनां वर्त्मनि सञ्चरतां धनानि प्राणाश्च हृताः तदा त्वयि श्रीमद्देवपादाः प्रकुप्ताः । स्वभावात् दस्युद्वेषिण एव राजानः । श्रुतञ्च मया तेन भयेन वने वने बहुतरदिनादारभ्य तिष्ठसि, तव ग्रामे उज्जटो विद्यते इत्यादिकरुणयाऽस्माभिः श्रीमद्देवपादेषु सदवसरे निवेदितं ततस्सदवसरगुणेनास्माकं प्रयत्नेन स्वकीयदाक्षिण्येन श्रीमद्देवपादैः पूर्वापराधस्तव क्षान्तः तथा राजलिखनं गच्छदेवास्ति । यदप्यग्रेऽपि कुवृत्तिन्निवृत्ति कर्त्तुं पारयसि तदा तद्राजलिखनं शिरसि कृत्वा लोकान् वासयित्वा परिवारान् ग्रामे धृत्वा त्वमत्रागमिष्यसीति ॥२४॥

स्वस्ति। (श्री)करणात् समस्तप्रक्रियाविराजमानमहामहत्तकठक्कुर-श्री अमुकमहाशयाः स्थानास्थानकश्रीअमुकान् संवादयन्ति। अत्र श्रुतं पुरपतिगृहे येन चौरेण चोरिका कृता चोरिवस्तुसमेतस्तत्रास्ति यद्येवं तदा तच्चौरं शृङ्खलैः संयम्य तद्वस्तुसमेतमत्र प्रहेष्यथ अन्यथा त्वन्न करिष्यथेति ॥२५॥

स्वस्ति। श्रीकरणात् सप्रक्रियमहासान्धिविग्रहिकठक्कुरश्रीअमुक-महाशयाः स्थानान्तरिकश्रीअमुकान् समादिशन्ति। समागतलिखनार्थः समाधिगत एव विपक्षराज्यदुर्गात् राउत्तपदातिसहिताः सेनापतिश्रीअमुक-परमयोग्याः समागत्य मिलिताः सन्तीति युष्माभिर्लिलिखितं तदनुरूपं तेषु समं समाश्वासं वासस्थानं योग्यभोग्यराजं दास्यथ, ततः स्वकीयसमाजेन तानत्र नेष्यथ। ततोऽत्र श्रीमद्देवपादाः समीचीनैर्व्वासोभिर्भूषणैस्तुरङ्गैश्च तानर्च्चयिष्यन्ति तेषां त्वत्समाजसमागतानां योग्यं जीव्यं करिष्यन्ति, दिव्यानुरूपांश्च ग्रामान् दास्यन्ति, अस्मिन्नर्थे राजादेशपत्रं गच्छदेवास्ति तत्पत्रं शिरसि निधाय परमसौमनस्येनानुगमिष्यथेति ॥२६॥

श्रीअमुकराजधानीतः प्रचण्डकलितकोदण्डश्रेणीखण्डखण्डीकृतविपुल-सेनासुभटशिरश्शोणिततरङ्गिणीततरङ्गसङ्गमसञ्जातप्रतापार्क्कसम्पर्क्कपरिम्ला-नीकृतसकलरिपुकुलकैरवकाननरिपुकरिघटाविघटनपञ्चाननविविधवसुदान-कथासमाहूतदुःखिजनदारिद्र्यमुद्राभञ्जनकृतसकलजनमनोरञ्जनेत्यादिस-मस्तप्रक्रियाविराजमानश्रीअमुकदेवपादाः समरविजयिनः अमुकपरिगणायां अमुकग्रामवास्तव्यसकलप्रजालोकान् समादिशन्ति। बिदितमस्तु भवतां ग्रामोऽयमस्माभिर्म्महामहोपाध्यायश्रीअमुकेभ्यश्चन्द्रार्कावधिना देवादिभूमि-व्यतिरिक्तः समुत्सृज्य ब्रह्मोत्तरत्वेन दत्तः। यत्र अमुकग्रामव्यवस्था ब्रह्मोत्तरम्।

सर्वेषामेव दानानामेकजन्मार्थगं फलम्।
क्षितिहाटकगौरीणां सप्तजन्मानुगं फलम् ॥१॥
भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति।
तावुभौ पुण्यकर्माणौ नियतं स्वर्ग्गगामिनौ ॥२॥
स्वदत्तां परदत्तां वा यो हरेश्च वसुन्धराम्।
स विष्ठायां कृमिर्भूत्वा पच्यते पितृभिः सह ॥३॥

इत्यादि वाक्यानुसारादत्र स्थैर्य्यं बुद्ध्वाऽमीषां वचसा वासचासौ करिष्यथ देयद्रव्यादिकश्च दास्यथेति ॥२७॥

स्वस्ति । अमुकराजधानीतो दानशौर्य्ययशःप्रतापमर्य्यादाविवेकादिनानाधर्म्मतुलिताखण्डलशरदिन्दुप्रसन्नमुखमण्डलानुगतजनविहगविश्रामकाननपरिपन्थिगजघटाविघट्टनपञ्चाननसमस्तप्रक्रियाविराजमानमहाराजाधिराजश्रीअमुकदेवपादाः समरविजयिनः चातुर्द्धरिकश्रीअमुकान् संवादयन्ति। महामहोपाध्यायश्रीअमुकेभ्यो यो ग्रामोऽस्माभिर्ब्रह्मोत्तरत्वेन प्रदत्तोऽस्तीति तथा राउतश्रीअमुकस्य यश्च ग्रामः शासनीकृत्य दत्तोऽस्तीति तयोर्ग्रामियोश्चतुस्सीमावच्छिन्नभूमौ वनजलकरादौ शासनपट्टकानुसारेण यूयं गत्वा प्रवृत्तिमनयोः कारयिष्यथेति ॥२८॥

श्रीकरणात् समस्तप्रक्रियाविराजमानमहासामन्ताधिपतिमहामहत्तकठक्कुरश्रीअमुकमहाशयाः साधुलोकान् वाणिज्योपजीविनः सर्व्वान् संवादयन्ति। अस्मिन् वर्षेऽशीतिसहस्राधिकलक्षद्वयेनामुकदेशस्य वाणिज्यदानं नियम्य क्षत्रियसट्ठक्कुरश्रीअमुकेषु समर्प्पितम्। यत्र वाणिज्यविषयदानदेयं २,८०,००० तदनयोर्व्यवस्थया क्रयविक्रयौ यातायातञ्च करिष्यथ। मूलषोडशभागञ्च करञ्च दास्यथ ॥२९॥

स्वस्ति। श्रीकरणात् समस्तप्रक्रियाविराजमानेत्यादिमहामहत्तकठक्कुरश्रीअमुकचरणाः हट्टोपजीविनो घटोपजीविनश्च संवादयन्ति। मतमस्तु भवतामस्मिन् वर्षे सर्व्वे हट्टा घट्टाश्च वणिक्साधुश्रीअमुकस्य सहस्रदशतयं नियम्य समर्प्पिताः। यत्र देय १०,००० तदमीषां व्यवस्थया क्रयविक्रयौ करिष्यथेति नदीवारावारञ्च करिष्यथ उचितराजकरञ्च दास्यथ ॥३०॥

श्रीअमुकनगरात् चातुर्द्धरिककार्य्यिश्रीअमुकमहाशयाः गोण्ढधीवरप्रभृतिवर्ग्गान् मत्स्यकच्छपव्यापादकान् समादिशन्ति। विदितमस्तु भवतां नदीनदपल्वलपुष्पकरिण्यादिजलाशयाः साहनिश्रीअमुकेषु सहस्रमेकं नियम्य प्रदत्ताः। यत्र नदीनदपल्वलप्रभृतिसकलजलाशयदेय १,०००। तदेषां व्यवस्थया जलचरवधं करिष्यथ। प्रतिवाटि(रि)कां प्रतिजलं यथाव्यवस्थितं करं दास्थेति ॥३१॥

बलकरणात् सप्रक्रियबलकरणिकठक्कुरश्रीअमुकमहाशयाः स्थानाध्यक्षेश्वरश्रीअमुकान् समादिशन्ति। युष्माकं स्थाने के के राउत्तपदातय-

श्चोपस्थितास्सन्ति नियुक्तीकृतानां मध्ये के न सन्ति तदुभयं लिखित्वा प्रहेष्यथ। तत्र द्विसीम्नि विपक्षशङ्काकुलस्थानके ये ये नियुक्ता राज्यजीव्यभुजः ते ते तत्र चेन्न सन्ति, तदा तेभ्यो राज्यजीव्यं परावृत्य ग्रहीष्यथ। किञ्चद्द्विगुणीकृत्य ग्रहीष्यथेति ॥३२॥

श्रीअमुककरणात् समस्तेत्यादिमहामत्तकठक्कुरश्रीअमुकमहाशयानां कार्य्यिश्रीअमुकेषु पत्रीयम्। चौहानराउत्तश्रीअमुकेषु पुराणसहस्रपञ्चतयंजीव्याभरणे विलब्धं (विलभध्वं), यत्र विलब्धं (विलभध्वं) ५,००० तदेषा पत्रीमादायामुकबर्षस्य देयं दास्यथ अथवा राजादेशात् दण्डितापराधदण्डसम्बन्धिधनं दास्यथेति ॥३३॥

अमुकग्रामात् महत्तमश्रीअमुकानां कर्मान्तिकश्रीअमुकेषु पत्रीयम्। कार्यञ्च य(क)स्मिन् कर्मान्ते त्वया किं धान्यमुप्तं उप्ते कियति केरलीकं करणभूतमस्ति तदस्मासु विलिख्यथ। खिलभूमौ[1] कियता धनोपक्षयेन कियत्क्षेत्रं सिद्धं कृतमित्यपि लिखनीयम्। अग्रेरोपणनिमित्तं गढवारमगहीप्रभृतिश्लक्षणधान्यबीजं पातयिष्यथ। क्षेत्रञ्च साधयित्वा कुद्दालैः सिद्धं करिष्यथ। वेतनं यदि बहिर्न्नं विद्यते तदा विद्यत एव नो चेद्वेतननिमित्तम-

---

१. Sir Monior Williams, A Sanskrit English Dictonary, पृ० ३४०; अथर्ववेद, ७·११५; विवादचन्द्र, पृ० ६५·६६। यत्र स्वामिनोऽशक्त्या दूरदेशस्थत्वादिना वा खिलोक्षेत्रमन्यः कर्षति तदा तत्फलं लभते एव।

अशक्तप्रेतनष्टेषु　　क्षेत्रिकेष्वनिवारितः।
क्षेत्रं चेद्विकृषेत् कश्चित् स तु तत्फलमश्नुते ॥१॥

इति वचनात् नष्टो व्यवहितदेशस्थः प्रेतो देशान्तरगतः, यदि क्षेत्रिकसन्निहितेन निवार्यते तदा नैवम्। यद्यन्तरागता क्षेत्रं जिघृक्षति तदा प्रहृतीकरणव्य दत्वा क्षेत्रमाप्नोति।

विकृष्यमाणक्षेत्रेषु क्षेत्रिकः पुनराव्रजेत्।
खिलोपचारं तत्सर्वं दत्वा क्षेत्रमवाप्नुयात् ॥२॥

इति वचनात्, खिलोपचारं खिलकर्त्तनव्यम्, यदि खिलोपचारं न ददाति क्षेत्रं च कष्टसाध्यं तदा तदुत्पन्नस्याष्टमं भागं ददानः सप्तसंवत्सरान् भुक्त्वा अष्टमवर्षे क्षेत्रपतेः कृते दद्यात्। अतिकष्टसाध्यं त्वष्टमवर्षेऽपि तथा भुक्त्वा दद्यात्।

स्मास्वत्र लिखिष्यथ तेनास्मात् प्रहीयते। वृषभपोषणं तथा वृषशालायां मशकोपद्रवः कर्दमोपद्रवश्च न भवति, तथा यत्नतः करिष्यथेति ॥३४॥

अमुकग्रामात् श्रीअमुकसिंहानां परमकल्याणभाजनेषु कल्याणिश्री-अमुकेषुशुभाशीःपत्रीयम्। कुशलमत्र। अन्यश्च—अत्र नित्यव्ययप्रयुक्तिर्नास्तीति राजगोचरं कृत्वा स्वकीयजीव्यं प्रार्थनीयम्। श्रीमदादेशेनैव-श्रीठक्कुराणां परितोषं विधाय पतितजीवसंख्याः श्रीमद्देवचरणेषु बोधयितव्याः सेना च महती कर्त्तव्या, तेन क्षान्तिरक्षापूर्वकं स्वीकीयजीव्यं प्राप्यते। अस्माकमपरे पुत्राश्च सन्ति तथापि परिवारपोषणप्रत्याशापात्राणि कुलाम्नायरक्षणक्षमाः श्रीमन्त एव शतवर्षं विराजन्तामित। किम्बहुनेति ॥३५॥

अमुकग्रामात् ठक्कुरराज्ञीअमुकदेवीनां परमाभङ्गुरमङ्गलासु कल्याणिनीश्रीअमुकदेवीषु शुभाशीःपत्रीयम्। कुशलमत्र। तत्रत्यकुशलं समीहामहे। कार्यञ्च ननन्दुरपरितोषेण सपत्नीकलहेन च श्रीमतीनां महती कुश्लेषवार्त्ता श्रूयते। तेनोद्वेगो मनसि विद्यते। यद्यपि दुहिता सन्ततिः पित्रोरुद्वेगनिमित्तमेवास्ति तथापि भवतीनां शीलैकधनानां सकलगृहकार्य-कुशलानां गुरुभक्तिपरायणानां बहुविधासमञ्जसकथां श्रोतुन्न शक्यते। यद्यपि ननन्दा दुश्शीला सपत्नी द्वेषिणी विरुद्धमाचेष्टते तथापि मौखर्यं विनिवार्य भवतीभिः शीलालम्बनमेव विधातव्यम्। वस्तुतस्तु प्रणतिसुरसा लोकद्वयोपकारिणी सौभाग्यसम्पत्करी स्वामिभक्तिः प्रतिक्षणमिङ्गिताज्ञा-नुसारिणी सर्वात्मना कर्त्तव्या। वैदेश्याद्यदितः खोजकरणार्थं मानुषो न गच्छति तदनुचितं क्षन्तव्यम्। सम्प्रति सन्देशत्वेन स्थूलपूगश्लक्षणवराटिका-सिन्दूरसुगन्धितैलकुसुम्भ-रक्तवस्त्राणि परिगृहीतव्यानि। वर्षाकालावसाने भवदीयो भ्राता भवदानयनार्थं गमिष्यत्येवेति ॥३६॥

अमुकनगरात् लेखि-श्रीठक्कुराणां परमकल्याणभाजनेषु प्राणाधिक-स्नेहापात्रेषु सत्पुत्रश्रीअमुकेषु शिरश्चुम्बनपूर्वकशुभाशंसनपत्रीयम्। कुशलमत्र। स्वकीयकुशलवार्त्तया वयं सततमानन्दभाजनं विधेयाः। वयमत्र राजस्थाने अधिकारमनुतिष्ठन्तो वर्त्तामहे। तदत्र चिन्ता कापि न कर्त्तव्या। अस्माकं कायस्थानां राजकार्यं कुर्वतां कदाचित्प्रभवः कुप्यन्ति, कदाचित्प्रसीदन्ति ततस्तत्कोपप्रसादवार्त्तया वैरोत्साहौ न कर्त्तव्यौ। उभयत्र सन्तोषमालम्ब्य स्वगृहे कार्याणि कर्त्तव्यानि विद्या चाभ्यसनीया। धनोपा-

र्जनं कुलोपार्जनं महदस्तीति मनस्येदमङ्गीकृत्य चाहर्निशं गुणभ्यासे हृदयं दातव्यमस्ति ॥३७॥

स्वस्ति। अमुकपत्तानात् महामहोपाध्यायश्रीअमुककेश्वरणां परममान्येषु परमस्नेहसिन्धुषु तपश्शीलकुलाचारचातुरीचारुचारित्रेषु जामातृश्रीमन्मिश्रश्रीअमुकमहाशयेषु बहुतरविनयविज्ञापनपूर्वकचतुर्वेदोक्तशुभाशंसनपत्रीयम्। कुशलमत्रेति सन्तोषः कर्त्तव्यः। स्वकीयकुशलवार्त्तामृतधाराभिस्सततं वयमभिषिञ्चनीयाः। कार्यञ्च यः श्रीमहाशयैरुपन्यस्तस्तस्मिन् वरे परेषामपि परमाशैँरत्र स्थैर्यं कृतम्। ततो दशमदिने शुभलग्नेऽस्माकं कन्याविवाहो भविष्यति। महाशयैः सकलत्रैरत्रागत्य स्वकीयाभिमुख्ये मङ्गलकार्यमिदं कारयितव्म्। तेन सर्वं सुभोमनं (सुशोभनं) भवतीति निवेदितम्। तेनेदं श्रीमन्तो जामातरः परममान्याः। स्वेनात्र कार्यसङ्कोचमङ्गीकृत्य कल्याणिश्रीअमुकः श्रीमान् तामानयनार्थं प्रहितोऽस्ति। स्वकीयभगिन्यानयनार्थमयमेव भवत्पितृचरणेषु चानुनयं करिष्यति। समयसङ्कीर्णो विलम्बन्न सहते तत्त्वरयात्र विजयः कर्त्तव्य इति ॥३८॥

स्वस्ति। श्रीकरणात् सुप्रतिष्ठमहापट्टनिकठक्कुरश्रीअमुकदासमहाशयानां पञ्जिकश्रीअमुकेषु पत्रीयम्। कार्यञ्च युष्माभिः करणे साध्यशेषपञ्जी या पूर्ववर्षे दत्ता लेखायां दीयमानायां तयोः संवादो नास्ति न वा निबन्धसंवादो विद्यत इति श्रुत्वा यावन्महामत्तकठक्कुर श्रीअमुकचरणैः प्रकोपो न क्रियते तावदेवागत्य पञ्जीसुश्लेषं करिष्यथ नो चेत्पञ्जीविसंवादेन दुश्शतपराभवभाजनं भविष्यथेति ॥३९॥

स्वस्ति। सरस्वतीखण्डात् सप्रक्रियमहासूपकारपतिश्रीअमुकमहाशयाः सूपकारान् संवादयन्ति—अस्माकमिदानीं कन्याविवाहव्यावृत्तिरस्ति। तेन वयं श्रीमद्देवपादानामाज्ञामादाय गृहङ्गच्छन्तो वर्त्तामहे। सूपकारेषु मध्ये भवन्तः प्रवीणज्ञानाः पाककुशलाः द्रव्यसंयोगपरिमाणविज्ञानं (जानन्ति) ततो यावदस्माभिः समागम्यते तावद्राजस्वसारं प्रत्यस्मत्प्रतिनिधित्वेन यूयं करिष्यथेति ॥४०॥

स्वस्ति। पर्णशालातः सप्रक्रियमहापर्णागारिकठक्कुरश्रीअमुकमहाशयाः स्वस्त्रागारिकश्रीअमुकान् संवादयन्ति। अत्र राजस्वस्त्रागारे ताम्बूले निःकार्याः कृताश्चतुस्समरूपकतया सितासितदूषिताश्च अकारि। श्वेतञ्च

पर्णं मृग्यते तेन यूयं पर्णकनिमित्तं प्रहिताः। सम्प्रति मासं व्याप्य तत्रैव तिष्ठथ। अत्र राजस्वसृयोग्यपणं नास्तीति मत्वा श्वेतपर्णं नीत्वा सत्वरमत्रागमिष्यथ।। सहस्रटङ्कानां भीमसेनकपूंरमपि नीत्वा नेष्यथ। नागरखण्डपर्णसिन्दूरपूगयोरनुसन्धानं कर्त्तव्यम्। यदा मिलति, तदा समानेतव्यमिति ॥४१॥

स्वस्ति। पनीयशालातः सप्रक्रियपानीयागारिकठक्कुरश्रीअमुकमहाशयाः कुम्भकारश्रीअमुकान् संवादयन्ति—कार्यञ्च अत्र पनीयशाला बहवः समीचीना न विद्यन्ते। तेन दिवा आतपं (पं) भीजयित्वा रात्रौ शिशिरे धृत्वा, जलार्द्रवाससा प्राच्छाद्य तालव्यजनेन पनीयं शीतलं कर्त्तुंन्न पार्य्यंते। बहुतरकलशसाध्यमेतदिति परिज्ञाय महतोमहतः कलशास्त्रिम्माय नीत्वा सत्वरं तत्रगमिष्यसि। श्रूयते वानिज्यव्यवसायिनः समागतास्सन्ति। तदोऽगुरुगुग्गुलसिद्दलकप्रभृति धूपद्रव्याणि प्रहितटक्कैरेकैकं क्रीत्वा सत्वरमत्रागमिष्यसि। पाटलावासितमुसी(शी)रवारि घटे घटे कृत्वा धारयिष्यसि। किं बहुनेति ॥४२॥

स्वस्ति राजधानीतः सप्रक्रियमहावार्त्तिकनैबन्धिकठक्कुर श्रीअमुकमहाशयाः वार्त्तिकश्रीअमुकं संवादयन्ति—अमुकेन राज्योद्यमवार्त्ताज्ञानार्थं प्रहितोऽसि। श्रूयतेऽत्र गृह एव तिष्ठसि। यद्येवं (तदा) लिखनसन्दशनादेव सत्वरं यत्र प्रहितोऽसि, तत्र गमिष्यसि। यदि गृहसुखलोभेन गृहे दिनमात्रं विलम्बं करिष्यसि, ततो राजशास्तिभाजनं भविष्यसि। राजजीव्यभुजां सेवकानां कुतो गृहसुखमिति? यद्येकवासरे वार्त्ता न प्राप्तव्या, तदा वार्त्तिकपुरुषस्य को गुण इति ॥४३॥

स्वस्ति। अमुककरणात् सप्रक्रियमहादेशनैबन्धिकठक्कुरश्रीअमुकमहाशयाः प्रतिनिधिपान् अमुकान् संवादयन्ति। यूयं कतिपयदिनकटेन गृहङ्गताः तत्रैव तिष्ठथ। ततो ज्ञायते राजशासनं विस्मृतं युष्माभिः। साम्प्रतमाषाढीसन्निधाने राउत्तपदातीनां बहुनिबन्धपञ्जीरहस्यविदो भवन्तः। तेनात्र भवदुपस्थितौ निबन्ध विरुद्धं कार्यंन्न भवतीति ॥४४॥

स्वस्ति। राजदेवार्च्चनगृहात् सप्रक्रियमहादेवागारिकठक्कुरश्रीअमुकेश्वरमहाशयाः पुष्पभट्टश्रीअमुकान् संवादयन्ति—यूयं स्वकार्य्यमुद्दिश्य गृहङ्ताः तत्रैव तिष्ठथ। अत्र देवार्च्चनकाले पुष्पेष्वनवधानं दृष्ट्वा श्रीमद्दे-

नपादानां चेतसि प्रकोपोऽनुमितः । तत्र ये ये वटवो मालाकाराश्च नोपस्थितास्सन्ति तान्नीत्वा सत्वरमागमिष्यथेति । तेन (ना) पर्युंषितानि केशकीटापविद्धविवर्ज्जितानि निश्छिद्राणि प्रहितानि ग्रथितानि पुष्पपत्राणि राजदेवार्च्चने सम्भवन्ति ॥४५॥

स्वस्ति । कोषागारात् सप्रक्रियमहाभण्डागारिकठक्कुरश्रीअमुकेश्वरमहाशयाः मुद्राहस्तकश्रीअमुकान् संवादयन्ति—यदा भवन्तो राजप्रस्थापिताः किमपि कार्यमुद्दिश्य तत्र प्रचलितास्तत्रैव मुद्रान्नीत्वा गताः । तत्र (न्न) भद्रं कृतम् । तया मुद्रया विना भाण्डागारे द्रव्यधारणे ग्रन्थिपातेन व्यवहारोऽस्तीति प्रतिज्ञाय स्वकीयप्रतिनिधिद्वारा मुद्रां सत्त्वरमत्र प्रहिष्यथेति ॥४६॥

इति श्रीविद्यापतिविरचितायां लिखनावल्यां अथः (धः) कक्षलिखनपरिपाटीनाम्नी द्वितीयग्रन्थना ॥

□

अथ समकक्षलिखनानि

स्वस्ति यशःकर्प्पूरपरागपूरिताशेषदिङ्मण्डलाखिलधरणिवलयेषु इष्टापूर्त्तमण्डिताशेषमेदिनीचक्रेषुसत्यव्रतपालनयुधिष्ठरेषु समस्तप्रक्रियाविराजमानमहाराजश्रीअमुकदेवसिंहेषुसङ्ग्रामशतविजयिषु अमुकग्रामात् श्रीअमुकराजस्य प्रेमपत्रीयम् । कुशलमत्र, स्वेषाञ्च सवाहिनीपरिवाराणां कुशलोदन्तेन वयमानन्दनीयाः । विज्ञापनञ्च अवयोर्म्मैत्री पूर्वस्माद्दिवसानुवर्त्तमाना तथैव विद्यते, यथास्मदीये कोषे जनपदे अन्येषु च श्रीमतामायत्तिरस्ति । तत्र श्रीमतां विदितं यवनेश्वरप्रहिता सेना भवद्भूमिं पराभवितुं निकटमागतस्ति । ततो यदस्माकमायत्तं श्रीमतामनुकूलं तदर्थस्मासु लिखनीयम् । सतां मैत्रीप्रस्तावे प्रयोजिकैव भवति । यदि यवनेश्वरेण समं सन्धिर्विधीयते, तदा वयं धनमौपायनवस्तूनि प्रस्थापयामः । यदा युद्धमारभ्यते, तदा सेनां प्रस्थापयामः । स्वयञ्च निकटमागत्य यदर्हति तत्कुर्म्मः । किं बहुनेति । बहिर्न्नामलिखनम् ।।४७।।

स्वस्ति । सन्धिविग्रहसामदानप्रस्तावोचितसकलोपायवार्त्तया पवित्राचार्य्येषु सहजविकस्वरकेतकीकुसुमकेसरकलापकमनीयकीर्त्तिषु सप्रक्रियमहासान्धिविग्रहिकठक्कुरश्रीअमुकेश्वरमहाशयेषु परमप्रेमरमणीयकुशलपत्रीयम् । विशेषतोऽपि कुशलमत्रेति स्वकीये मनसि सन्तोषः पोषणीयः । तत्र (त्य) कल्याणोदन्तशतकैः सततं वयमानन्दनीयाः । पुरा भवदीयभूपानां प्रेमार्थिना माचरितं दृष्ट्वाऽस्माभिः स्वकीयप्रभुभिः प्रेमाचरितम् । एते राजाना महेच्छामहात्मानो यद्वृत्तं, तत्कृतवन्तः परिपालयन्तश्च सन्ति । तेनोभयभूमिसीम्नि प्रान्ते लोकाः कृषिं कुर्व्वाणाः वसन्तस्सन्ति—निश्शङ्कं स्वपन्ति निराकुलाः तिष्ठन्ति । सम्प्रति भवदीयानां राज्ञां परिजनव्यापारेण क्वापि क्वापि कौटिल्यं स्फुटीभवति । तच्च कौटिल्यं यद्यत्र प्रभुभिर्ज्ञातव्यं, तदाऽमी राजानो नानुचितं सहिष्णवः कोपं करिष्यन्तीति । प्रवृद्धः सः कोपानलः केन निर्व्वापयितव्यः ? तस्मिन् राज्ये भवन्त एव मन्त्रिणो वयं यस्मिन् राज्ये राजसन्निधानवर्त्तिनो भवामः । तदावयोः प्रेमकारितं यदि व्यभिचरति, तदावयोरेव लाघवम् । राजानः सहजस्वतन्त्राश्च, यदिच्छन्ति स्वयं तत्कुर्व्वन्ति । दूषणन्तु मन्त्रिण एव लोकैरवगम्यते इति प्रतिज्ञायामी

मनुष्या नादत्तव्याः, द्वेषिणः समुद्धरणीयाः, भूमिर्न्नातिक्रमणीया। एभिस्समं यदुच्यते तत्कृतिभिः सम्प्रति वक्तव्यम्। तेन चिरजीवा चिरतरा प्रीतिर्भवतीति। बहिर्न्नाम लिखनम् ॥४८॥

स्वस्ति। परममान्येषु परमसौजन्यसिन्धुषु आचारचरित्रपवित्रोभयवंशभगीरथेषु सदुपाध्यायश्रीअमुकशर्म्ममहाशयेषु अमुकग्रामात् परमप्रेमाभिरामविनयविज्ञापनपत्रीयम्। कुशलमत्र। तत्रत्यकुशलेन वयमानन्दनीयाः। कार्यञ्चश्रीमन्तः श्रोत्रियाः कुलीनाः सर्व्वविद्यापारगाः सदाचारनिष्ठाः। तेन स्वीयोत्कर्षमभीप्सुभिरस्माभिः श्रीमद्भिः सममयमपत्यसम्बन्धः कृतः। प्रत्युत या पुत्री भवत्पुत्राय प्रतिपादिता, तस्याः परमदुर्गतिकथा काऽपि पिहितैवास्तु। भवन्तः ख्यापयन्ति यत् तेन सम्बन्धेनास्माकं स्वजनवैराग्यमभूदिति। कथमिदमर्थशून्यं वचनमभिधीयते? किञ्च विपरीतमस्ति। स्वकीयमहत्त्वं प्रत्याकलनीयम्। किमपरं मान्येषु विज्ञेषु विज्ञापनीयम्? बहिर्न्नामलिखनम् ॥४९॥

स्वस्ति। अमुकग्रामात् कुन्दावदातकीर्त्तिषु सुप्रतिष्ठसाधुश्रीअमुकमहाशयेषु श्रीअमुकस्य प्रेमपत्रीयम्। श्रीमतां कुशलमत्र। कार्य्यञ्च – वयं सिद्धमनोरथाः समुद्रपारादायातः। बहित्रञ्च वस्तुपूर्णं मणिपूर्णमविघ्नेनायतमित्युत्साहः कर्त्तव्यः। अपरञ्च – श्रीतमां कुलशीलं कृतज्ञतामहत्त्वञ्च दृष्ट्वाऽस्माभिर्म्मैत्री कृता। श्रीमतां कृतसंवादिना व्यवहारेण दिने दिने सा प्रतिपञ्चन्द्रलेखेव परमोत्कर्षकाष्ठां प्राप्ता। मैत्रीफलं द्वितीयं प्राणाधीनं बालाधीनञ्च। अस्मत्प्राणाधीनं कार्य्यं कदा श्रीमहाशयानां भविष्यति, कदा वा अस्माभिर्न्निर्वाहनीयमिति परमेश्वरो जानाति। धनाधीननिर्व्वाहे सदाऽमद्वस्तुग्रहणे श्रीमन्त उदासीना दृश्यन्ते। (नै) तन्मैत्रीफलम्। सम्प्रति वयं वणिजो वाणिज्यार्थं देशान्तरङ्गताः। तत्र मुक्ताफलचतुष्टयमुत्तममाप्तम्। तद्रत्नं भवद्योग्यं विद्यते। तेनास्माभिः प्रहितमस्ति तद्ग्रहणे सङ्कोचो न कर्त्तव्यः। सङ्कोचः परवस्तुग्रहणे क्रियते। मैत्री चेत्परभावः कुतः? यद्यपि सतां मैत्री करणनिरपेक्षैव भवति, तथापि उचितपूजाभिरलङ्कृता शोभते। यत्र सन्देशत्वेन प्रहितान्यामलकीफलपरिमाणवत्तुंलद्युतिमन्ति मुक्ताफलानि। यत्र मुक्ताफल ४। अपरञ्च पत्रचिह्नार्थं प्रहित पट्टवस्त्रखण्ड १४, कर्प्पासवस्त्रखण्ड २०, रजतभाजन ४, सुवर्णभाजन १, कर्प्पूर पल १०, चन्दन सवचोन पल १,०००। किं बहुनेति। बहिर्न्नामलिखनम् ॥५०॥

स्वस्ति। परमावदातचरितेषु परमपवित्रकीर्त्तिकेतकीकुसुमसौरभवासितवसुधातलेषु सुध्किवरकुमारश्रीअमुकसिंहेषु अमुकग्रामात् निसर्गसौहृदसुधाधारिशुद्धप्रेमपत्रीयम्। कुशलमत्र। तत्रत्यकुशलं समीहामहे। कार्य्यञ्च—श्रीमद्भिः श्रीमद्देवपादैः समं मौखर्य्यं कृतं तन्न भद्रं कृतम्। यद्यपि मन्तः अम्नायिकाः सर्व्वदापि राजसम्मानपात्राणि बहुतरसङ्ग्रामे लब्धयशसः पराभवन्न सहन्ते, तथात्यमी राजानः प्रभवः, किमप्यमीषां सर्व्वदैवोर्जित्यं (?) रक्षणीयं भवति। समस्पर्द्धया वाग्युद्धं नोचितम्। दिवसदूषणेन भूत्वा पतितं वचनानुवचनेन दुर्व्विचिन्ततं—तदा रोषेण स्थानत्यागः कथं कृतः। प्रभवो यदा धनैस्तुष्यन्ति, भूषणादिभिः पूजयन्ति, तदा प्रभवः, यदि वा कदाचित्कुष्यन्ति, तदा किंप्रभवः। कुलीनानां नेयं मर्य्यादा। साम्प्रतमपि रोषेण भवन्तो नगराद्बहिर्गताः। यत्र स्थीयते तत्रैव स्थातव्यम् यवद्वयमागच्छामः। श्रीमद्देवपादा अपि लज्जिताः सन्ति। श्रीमन्तोऽप्यनुनयार्थमागमिष्यन्ति। क्वापि न गन्तव्यमिति निश्चितम् गन्तव्यं तदाऽऽवाभ्यां सहैव गन्तव्यम्। अवयोरेकत्र सहवासो विद्याभ्यासः साहित्यमेवं प्रभुसेवा सङ्ग्रामश्च विद्यते। तदेकत्रावस्थाने सर्वमाद्यन्तविशुद्धं भवतीति यत्र स्थीयते, ततः पदमात्रमपि पुरो न गन्तव्यम्। यदि गम्यते, तदास्माकं शतं शपथा इति। बहिर्न्नामलिखनम्॥५१॥

स्वस्ति। न्यायोपार्जितवित्तवत्तापवित्रेषु यथाकालोचितचरिताचरणविचक्षणेषु गङ्गाप्रवाहनिर्मलमानसेषु वणिक्श्रीअमुकमहाशयेषु गोपालपुरात् विविधविनयोपनेत्री यथार्हपत्रीयम्। श्रीमतां स्वभावस्नेहात् कुशलमत्रेति सुचेतसि सुचेतसः सन्तोषः पोषणीयः। स्वकीयया सार्वदिकोत्साहवार्त्तया वयमानन्दनीयाः। कार्य्यञ्च—समागतमिखनार्थः समधिगतः। अस्माकं कृषिवृत्तीनां सर्वधान्यानां बीजमस्ति। तुलसीधान्यस्य बीजन्न विद्यते। तेन पुराणपञ्चाशत्प्रहितकपर्द्दकैः तद्बीजं क्रायंयित्वा दातव्यमिति यल्लिखितम्। श्रीमन्तः कृषिवृत्तयो देशकालोचितविधानकुशला इति बहूनां द्वारा बहुधा श्रुतमस्ति। वयमपि कृषिवृत्तय एव। तदाऽऽवयोरनन्यवृत्तितया प्रेमाचरणमुचितम्। तेनाऽस्माभिः तुलसीधान्यस्य बीजं गोलाबीजञ्च पञ्चाशततयं प्रेम्णैव प्रहितम्, यद्गृहीतव्यं च भवद्भिः। कपर्दकाश्च श्रीमतां यथागता एव गच्छन्तस्सन्ति तद्गृहीतव्याः पुरुषद्वारेति। बहिर्न्नामलिखनम्॥५२॥

स्वस्ति । निरवद्यराजनीतिनिष्णातमतिषु धर्मस्थितिस्थापनप्रकारपर (म) विख्यातहृदयशुद्धिषु समस्तेत्यादिमहामहत्तकठक्कुरश्रीअमुकेषु परम-सौहृदसुधासारसंसिक्तविनयविज्ञापनपत्रीयम् । कुशलमत्र । तत्रत्यकुशलं समीहामहे । कार्यञ्च—अत्र श्रूयते श्रीमहाराजाः श्रीअमुकमहाशयानां अनपेक्षया राज्यचर्यां कुर्वन्ति । श्रीमहाशयैः समं पूर्ववत् हृदयसङ्गति-र्नास्ति । तेनास्मच्चेतसि वैरस्यं विद्यते । वयं श्रीमहाशयानां सुहृदः, ते प्रभवः । प्रभुसेवा कर्मणा मनसा वाचा यावज्जीवं परिपाल्यते, कुलीना-नामिदमेव कृत्यम् । प्रभवः किमपि कुर्वन्तु, श्रीमद्भिर्मर्यादा न त्यक्तव्या । त्यज्यते वा तदा वयं श्रीमहाशयानां सुहृदः तिष्ठामः । अस्माकं धनानि प्राणाश्च विद्यन्ते ततोऽस्माकमायत्ते वस्तुन्यासक्तिः कर्त्तव्या । यदादिष्टं भवति, तदा तन्निश्शङ्कं युष्मास्वादेशनीयम् । सम्पदि केषां के सुहृदः ? सुहृदस्तु प्रस्तावे परिचीयन्ते । किं बहुनेति । बहिर्नामलिखनम् ।।५३।।

इति विद्यापतिविरचितायां लिखनावल्यां समकक्षपरिपाटिर्नाम तृतीयग्रथना ।

□

अथ व्यवहारलिखनानि

सिद्धिः। लसं २९९ माघवति ५ बुधे अमुकग्रामे प्रतिहस्तक महामहोपाध्यायश्रीअमुकशर्मभिः सपरिषद्भिः अर्थिब्राह्मणश्रीदेवदत्तप्रत्यर्थिराउत्तश्रीजयदत्तयोः ऋणविषयकविवादे मम पितुः पुराणशतमेकं कपर्द्दकं कलाव्यवस्थया अतीतपञ्चमवर्षे प्रत्यर्थिना ऋणत्वेन प्रगृहीत, तदिनानीं सोऽयं ददात्विति अर्थिना भाषायां कृतायां मया तद्धनं गृहीतम्। किन्तु तत्सर्वं मया कलासमेतमर्थिपितरि प्रत्यर्पितमिति प्रत्यर्थिनोत्तरिते भाषोत्तरे परामृश्य विचारे प्रारब्धे, करणोत्तरप्रत्यर्थिदिशि अनुसन्धाने अमुकामुकामुकशर्माणः त्रयः साक्षिणः प्रत्यर्थिनोपन्यस्ताः अर्थिना स्वीकृताश्च। तैः साक्षिभिर्व्यवस्थापितनिगददिने समागत्य सत्यपुरस्सरं निगदानात् प्रत्यर्थिना पूर्वगृहीतकपर्द्दकं पुराणशतमेकं सोदयं दत्त्वा निस्तीर्णमिनि सत्यम्। यस्योचुः साक्षिणः सत्यां प्रतिज्ञां विजयी भवेत्। अन्यथा वादिनो यस्य भवेत्तस्य पराजयः। इत्यर्थिनः पराजय इत्यवधार्य प्रत्यर्थिश्रीअमुकाय जयपत्रामद दत्तमिति ॥५४॥

सिद्धिः। परमभट्टारकेत्यादिराजावलीपूर्व्वंगतराजश्रीलक्ष्मणसेनदेवीयनवनवत्यधिकद्विशततम वर्षे भाद्रशुक्लचतुर्द्दश्यां शुक्रवारान्वितायामव मासपक्षतिथिदिवसानुक्रमण कालेऽभिलख्यमान यत्राङ्कनापि लस २९९ भाद्रशुदिः १४ शुक्र पुनः परमभट्टारक परमत्यादिसमस्तप्रक्रियाविराजमानपुण्यावलोकाश्वपतिगजपतिनरपतिराजत्रयाधिपतिराजसहस्रससेव्यमानखोदायवरलब्धप्रसादसकलविरुदावलीसमलङ्कृतमहासुरत्राणसाहिप्रचारे पुनः समस्तप्रक्रियाविराजमानारिपुराजकंसनारायणशिवभक्तिपरायणशीलपुण्यावलोकमहाराजाधिराजश्रीअमुकदेवपादानां सम्भुज्यमानराज्ये तीरभुक्तौ रत्नपुरदेशप्रतिबद्धमीगोतप्पासंलग्नमिम्बराग्रामे श्रीअमुकदत्ताः शूद्रशूद्रीक्रयणार्थं स्वधनं प्रयुङ्क्ते। धनग्राहकश्चैतत्सकाशात् नामतो राउत्तश्रीअमुकदत्त केनापि चाड्येन स्वदासं कैवर्त्तं वर्षचतुश्चत्वारिंशत्समुद्देशित वयस्कं श्यामवर्णं अमुकनामानं रूप्यटङ्कषट्तयेन तथैव तस्य वधूं समुद्दिशितवर्षत्रिंशद्वयस्कां गौरवर्णां अमुकीनाम्नीं रूप्यटङ्कचतुष्टयेन तथैव तयोः पुत्रं वर्षषोडशतयोद्दिशितव्यस्कं गौरवर्णं अमुकनामानं रूप्यटङ्कत्रयेण तथैव तयोः

पूत्रीं वर्षाष्टतयोद्देशितवयस्कां श्मामवर्णाममुकीनाम्नीममीषु धनिषु गोत्रा-गोत्रनिवारकं दत्वा चन्द्रार्क्कावधिना विक्रीतवन्तः। यत्र विक्रीत शूद्र शूद्री प्राणो विक्रयाङ्क १४। गोत्रागोत्रनिवारकाय समुभयदेये २।२। तदमी शूद्रा धनिकावासे हलवाहनोच्छिष्टस्फेटनपानीयानयन दोलोद्वाहनादि सकल-कर्म्मं करिष्यन्ति। यदि कदाचित्प्रपलाय्य गच्छन्ति थदाऽनेन पत्रपात्र-प्रामाण्येन राजसिंहासनतलगता अपि समुद्धृत्यानीय तदेते पुनर्द्दासकर्म्मणि युज्यन्ते। अत्रार्थे साक्षिणः देवदत्तयज्ञदत्तविष्णुमित्रादयः कृता भूताश्चेति लिखितमिदमुभयानुमत्या कायस्थश्रीअमुकेन। लिखापन देय समुभय रु १।१ इति। भरणपत्रमपीदमेव योज्यं श्वेतरूप्यटङ्क १४ विक्रयांक। धनं परीक्ष्य गृहीतं पत्रस्था एव साक्षिणः ॥५५॥

